उपशास्त्री-II साहित्य - तृतीय - पत्रम्
किरातार्जुनीय महाकाव्यम्
Date ___/___/___ प्रथमः सर्गः

प्र० (1)- पद्य मिदम् व्याख्येयम् ।
अनारतं यौ मणि पीठशायिनावरंजयद्राजशिरः स्रजां रजः ।
निषीदतस्तौ चरणौ वनेषु ते मृगद्विजालून शिखेषु बर्हिषाम् ।।

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि भारवि विरचितस्य किरातार्जुनीय महाकाव्यस्य प्रथमसर्गात् उद्धृतोऽस्ति।
अस्मिन् श्लोके द्रौपदी युधिष्ठिरं प्रति कथयति - निरन्तरं मणिमयपीठेषु विराजमानौ यौ भवच्चरणौ प्रणमतां राज्ञां मौलिस्थमालातः प्रपतता परागेण निरन्तरमरज्येताम् तावेव संप्रति मृगैस्तपस्विभिश्च छिन्न शिरःसु कुशकण्टकेषु तिष्ठतः । इयं ते दुर्दशा जातेत्यर्थः ।

व्याख्याः- अनारतं = निरन्तर । मणिपीठशायिनौ = रत्नजटित चौकीपर रहने वाले । यौ = जिन (तुम्हारे चरणों) को । राजशिरः स्रजां रजः = राजाओं के मस्तकपर की मालाओं का पराग । अरञ्जयत् = रंग देता था । तौ ते चरणौ = वे ही तुम्हारे चरण । मृगद्विजालूनशिखेषु = मृगों और ऋषियों द्वारा खूँटी गई शिखाओं वाले । बर्हिषां वनेषु = कुशाओं के वनों में । निषीदतः = रहते हैं ।

Renu Devi
06/12/20
राधा उमाकांत सं० महावि० सुखसेना, पूर्णिया ।

शास्त्री-I साहित्य
अभिज्ञानशाकुन्तलम्

Date ___/___/______

प्र० (1) - अभिज्ञानशाकुन्तलं रूपकस्य कः भेदः?
उत्तरम् - अभिज्ञानशाकुन्तलं रूपकस्य नाटकभेदः।
प्र० (2) - अभिज्ञानशाकुन्तले कति अङ्काः सन्ति?
उत्तरम् - अभिज्ञानशाकुन्तले सप्त अङ्काः सन्ति।
प्र० (3) - स्रष्टुः आद्या सृष्टिः का?
उत्तरम् - स्रष्टुः आद्या सृष्टिः जलरूपा।
प्र० (4) - विधिहुतं हविः कः वहति?
उत्तरम् - विधिहुतं हविः पावकः वहति।
प्र० (5) - कया प्राणिनः प्राणवन्तः?
उत्तरम् - वायुरूपया भगवतः मूर्त्या प्राणिनः प्राणवन्तः भवन्ति।
प्र० (6) - का सर्वबीजप्रकृतिराहुः?
उत्तरम् - पृथ्वीरूपा भगवतः तनुः सर्वबीजप्रकृतिराहुः।
प्र० (7) - अभिज्ञानशाकुन्तलस्य प्रथमे श्लोके किं छन्दः?
उत्तरम् - अभिज्ञानशाकुन्तलस्य प्रथमे श्लोके स्रग्धरा - छन्दः विज्ञेयम्।
प्र० (8) कस्य दिवसाः परिणामरमणीयाः?
उत्तरम् - ग्रीष्मसमयस्य दिवसा परिणाम रमणीयाः।

Renu Devi
06/12/20
राधा उमाकान्त मॉ० महाविद्यालय सुरवसेना,
पूर्णिया।

Page No.

उपशास्त्री-I साहित्य - तृतीय - पत्रम

किरातार्जुनीय महाकाव्यम

प्रथमः सर्गः

Date ___/___/___

प्र०(1) - पद्यमिदम् व्याख्येयम् ।

पुरोपनीतं नृप! रामणीयकं द्विजातिशेषेण यदेतदन्धसा ।
तदद्य ते वन्यफलाशिनः परं परैति कार्श्यं यशसा समं वपुः ॥

उत्तरम्:- प्रसंगः- प्रस्तुतोऽयं श्लोकः महाकवि भारवि प्रणीतस्य किरातार्जुनीय महाकाव्यस्य प्रथमसर्गात् उद्धृतोऽस्ति। अस्मिन् श्लोके द्रौपदी युधिष्ठिरं प्रति कथयति-

हे राजन! पूर्वं ब्राह्मणान् सादरं भोजयित्वा तदवशिष्टमन्नं भुक्तवतस्तव यत् शरीरं मनोहरमासीत् साम्प्रतं वन्यानि फलान्यश्नतस्ते तदेव शरीरं यथा क्षीणतामुपैति तथैव ते कीर्तिरपि क्षीयते।

व्याख्या:- नृप = हे राजन! यत एतत् = जो यह। (ते वपुः = तुम्हारा शरीर) पुरा = पहिले। द्विजातिशेषेण = ब्राह्मणों के खा लेनेपर बचे हुए (उच्छिष्ट)। अन्धसा = अन्न से। रामणीयकं = मनोहरता को। उपनीतम् = प्राप्त होता था। अद्य = आज। वन्यफलाशिनः = जंगल के कन्द मूल - फलों का आहार करनेवाले। ते = तुम्हारा। तद्वपुः = वही शरीर। यशसा समं = कीर्ति के साथ। कार्श्यम् = कृशता को परैति = प्राप्त हो रहा है।

Renu Devi,
06/12/20
राध्या उमाकान्त सं० महावि० सुरवसेना, पूर्णिया।

Page No. ____

शास्त्री-II साहित्य

रघुवंश महाकाव्यम् - त्रयोदश-चतुर्दश सर्गौ

Date __/__ लघुत्तरीय प्रश्नोत्तराणि

प्र० (1) - केन प्रकारेण पुष्पकविमानस्य स्वमनोऽनुगामित्व वर्णयामास श्रीरामः ?

उत्तरम् - श्रीरामः सीतामाह -
क्वचित्पथा सञ्चरते सुराणां क्वचिद्घनानां पततां क्वचिच्च ।
यथाविधो मे मनसोऽभिलाषः प्रवर्तते पश्य तथा विमानम् ॥

प्र० (2) - केन श्लोकेन श्रीरामः पुष्पक विमानस्य देवमार्गगामित्वं वर्णयामास ?

उत्तरम् - असौ महेन्द्रद्विपदानगन्धिः त्रिमार्गगावीचिविमर्दशीतः।
आकाशवायुर्दिनयौवनोत्थान् आचामति स्वेदलवान् मुखे ते ।

प्र० (3) - केन प्रकारेण लताः राम सीताऽपनयनमार्गं रामं सं सूचयामास ?

उत्तरम् - आवर्जित पल्लवाभिः शाखाभिः ।

प्र० (4) - मृग्यः केन प्रकारेण सीताऽपहरणमार्गं श्रीरामं सूचयामास ?

उत्तरम् - उत्पक्ष्मराजीनि विलोचनानि दक्षिणस्याम् व्यापारयित्वा ।

प्र० (5) - माल्यवति पर्वते मेघगर्जनानि श्रुत्वा सीता विहीनो रामः केन प्रकारेण दिनानि अतिवाहितवान् ?

उत्तरम् - अतीव कष्टेन ।

Renu Devi
06/12/20
राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया ।

Page No. ____